शक्यतावच्छेदकं, त्रि, (शक्यताया अवच्छेदकम् ।) शक्यांशे भासमानधर्म्मः । यथा ।

"एवञ्च तादृशधर्म्मस्य शक्यतावच्छेदकत्वं दुर्व्वारमेव ।" इति शक्तिवादः ॥

शक्रः, पुं, ( शक्नोति दैत्यान् नाशयितुम् । शक + "स्फायितञ्चीति ।" उणा० २।१३ । इति रक् ।) इन्द्रः । इत्यमरः । ( यथा, रघुः । ३ । ३९ ।

"धनुर्भृतामग्रत एव रक्षिणां
जहार शक्रः किल गूढ़विग्रहः ॥")

कुटजवृक्षः । अर्ज्जुनवृक्षः । इति मेदिनी ॥ ज्येष्ठानक्षत्रम् । यथा,—

"शक्रो निर्ऋतिस्तोयं विश्वविरिञ्चौ हरिर्वसु-
र्व्वरुणः ।
अजपादोऽहिर्व्रध्नः पूषा चेतीश्वरा भानाम् ॥"
इति ज्योतिस्तत्त्वम् ॥

चतुर्द्दशेन्द्रा यथा,—

"विश्वभुक् च विपश्चिच्च सुचित्तिः शिविरेव च ।
विभुर्मनोजवश्चैव तथौजस्वी वह्निस्तथा ॥
अद्भुतश्च तथा शान्तिस्तथा देवचरो वृषः ।
ऋतधामा दिवःस्वामी शुचिः शक्राश्चतुर्द्दश ॥"*
ब्राह्मदिनमासाब्देषु इन्द्राणां नाशसंख्या यथा ।
"ब्राह्मे दिने वै नश्यन्ति चतुर्द्दश पुरन्दराः ।
शतानि मासि चत्वारि विंशत्या सहितानि च ।
अब्दे पञ्चसहस्राणि चत्वारिंशच्छतानि च ॥"
इत्याद्ये वह्निपुराणे गणभेदनामाध्यायः ॥*॥

इन्द्रत्वप्राप्तिकारणं यथा,—

इन्द्र उवाच ।

"रमाकान्त भवत्प्रीत्यै कृतं क्रतुशतं पुरा ।
तेन पुण्येन सम्प्राप्तं मया पौरन्दरं पदम् ॥
इदानीं नूतनः कोऽपि जातो दिवि पुरन्दरः ।
न तेन धर्म्मो विहितो न तेन क्रतवः कृताः ।
मम सिंहासनं दिव्यं कथमाक्रान्तमच्युत ॥
इत्येवं वदतस्तस्य श्रुत्वा वाक्यं रमापतिः ।
उन्मीलितस्मिताच्योऽसावुवाच मधुरं वचः ॥

श्रीभगवानुवाच ।

देवाद्यो मनुष्यान्ता मम सेवापरायणाः ।
मद्यजनरता लोका मद्भक्तिस्तुतिपाठकाः ॥
मन्मूर्त्तिषु कृतध्याना मत्कथाश्रवणा इह ।
मत्पादोदकनैवेद्यभोजिनोऽन्वहमेव ये ॥
मन्नामकीर्त्तनपरा मम स्तुतिपरायणाः ।
मन्मन्त्रजापका नित्यमनन्याश्रयसम्पदः ॥
किं विधित्वं किमिन्द्रत्वं देवत्वमपरं किमु ।
तेषामलभ्यं यत्किञ्चित् दुर्लभं नास्ति संसृतौ ॥
किं दानैरल्पफलदैः किं तपोभिः किमध्वरैः ।
सेव्यमानैः चिंतितव्ये स मम प्रीतिमान् सदा ॥

इन्द्र उवाच ।

भगवन् कर्म्मणा केन स त्वत्प्रीतिपरो भवेत् ।
तद्वदस्व महाबाहो प्रपन्नभयभञ्जन ॥

श्रीभगवानुवाच ।

अनेकधा मद्भजनं मम प्रीतिकरं परम् ।
यद्भक्त्या तत् पदं लेभे तत् शृणुष्व पुरन्दर ॥
जपत्यष्टादशाध्यायगीतानां श्लोकपञ्चकम् ।
तया भक्त्या तु संप्राप्तं तव साम्राज्यमुत्त-
मम् ॥"
इति पाद्मोत्तरखण्डे ६६ अध्यायः ॥

( समर्थे, त्रि । यथा, ऋग्वेदे । ४ । १६ । ६ ।

"विश्वानि शक्रो नर्य्याणि विद्वा-
नपो रिरेच सखिभिर्निकामैः ॥"

"विद्वान् जानन् शक्रः समर्थ इन्द्रः ।" इति तद्भाष्ये सायणः ॥ )

शक्रक्रीड़ाचलः, पुं, (शक्रस्य क्रीड़ाचलः क्रीड़ा-पर्व्वतः ।) सुमेरुपर्व्वतः । इति हलायुधः ॥

शक्रगोपः, पुं, इन्द्रगोपकीटः । इति जटाधरः ॥ ( यथा, हरिवंशे । ६६ । ५ ।

"नववर्षावसिक्तानि शक्रगोपाकुलानि च ।
नष्टदावाग्निमार्गाणि वनानि प्रचकाशिरे ॥")

शक्रजः, पुं, ( शक्राज्जायते इति । जन + डः । ) काकः । इति त्रिकाण्डशेषः ॥ इन्द्रजाते, त्रि ॥

शक्रजातः, पुं, ( शक्राज्जातः । ) काकः । इति शब्दरत्नावली ॥ इन्द्रजाते, त्रि ॥

शक्रजित्, पुं, (शक्रं जितवानिति । जि + क्विप् ।) रावणपुत्त्रः । इति त्रिकाण्डशेषः ॥ ( यथा, रघुः । १४ । ८३ ।

"अपि प्रभुः सानुशयोऽधुना स्यात्
किमुत्सुकः शक्रजितोऽपि हन्ता ॥")

इन्द्रजेतरि, त्रि ॥

शक्रद्रुमः, ( शक्रस्य द्रुमः । ) देवदारुवृक्षः । इति भावप्रकाशः ॥

शक्रधनुः, [स्] क्ली, ( शक्रस्य धनुः । ) इन्द्रधनुः । इत्यमरः ॥ गण्डी इति रामधनुक इति च भाषा ॥

"इन्द्रायुधं शक्रधनुः कौशिकायुधमित्यपि ।
ऐरावतं रोहितं स्यादवक्रं यदि तद्धनुः ॥"
इति शब्दरत्नावली ॥

( यथा, महाभारते । ५ । ५६ । ११ ।

"यथाकाशे शक्रधनुः प्रकाशते
न चैकवर्णं न च विद्म किन्नु तत् ॥")

शक्रध्वजः, ( शक्रस्य ध्वजः । ) इन्द्रध्वजः । (यथा, आर्य्यासप्तशत्याम् । २६६ ।

"ते श्रेष्ठिनः क्व सम्प्रति शक्रध्वज ! यैः कृत-
स्तवोच्छ्रायः ।
ईर्षां वा मेढिं वाधुनातनास्त्वां विधित्सन्ति ॥")

तद्विवरणं यथा,—

नृपवाहन उवाच ।

"भगवन् श्रोतुमिच्छामि तस्य उत्थापनं यथा ।
क्रियते दिन ऋक्षे च द्रव्यमन्त्रविधिं वद ॥

अगस्त्य उवाच ।

ब्रह्मणा कथितं शक्र बृहस्पतिसमीपतः ।
यथा तथा प्रवक्ष्यामि विधिं केतोः समुच्छ्रये ॥

बृहस्पतिरुवाच ।

शुभाहे ऋक्षे करणे मुहूर्त्ते शुभमङ्गले ।
दैवज्ञः सूत्रधारश्च वनं गच्छेत् सहायवान् ॥
देवीप्रतिष्ठाविधिना यात्रायां या प्रचोदिता ।
गत्वा वृक्षं शुभं पुण्यं धवार्ज्जुनप्रियङ्करम् ॥
उडुम्बराजकर्णांश्च पञ्चैते शोभना हरेः ।
ध्वजार्थे वर्जयेद्वत्स देव उद्यानजान् द्रुमान् ॥
कन्या मध्ये तु या यष्टीः करमानेन कल्पयेत् ।
एकादशकरा वत्स नव पञ्च करापरा ॥
अरालतां क्रिमिचितां तथा पक्षिनिकेतनाम् ।
वल्मीकपिल्ववनजां सुशुष्ककोटरान्तराम् ॥
कुब्जाश्च घटसिक्ताश्च तथा स्त्रीनामगर्हिताम् ।
विद्युद्वज्रहताश्चैव दग्धाश्च परिवर्जयेत् ॥
अलाभे चन्दनं आम्रं शालशाकमयं तथा ।
कर्त्तव्यं शक्रचिह्नार्थे न चान्यं वृक्षजं क्वचित् ॥
शुभभूमिभवं ग्राह्यं शुभतोयं शुभावहम् ।
ततः संपूजयेद्वृक्षं प्राङ्मुखोदङ्मुखोऽपि वा ॥
नमो वृक्षपते वृक्ष त्वामर्च्चयति पार्थिवः ।
ध्वजार्थं तत्त्वतो नाथ अन्यथा उपगम्यताम् ॥
रात्रौ देयो बलिस्तत्र युगवृक्षे तथैव च ।
वासवानां महावृक्षं कृत्वा चान्यत्र गम्यताम् ॥
ध्वजार्थे देवराजस्य न चान्तिस्तव अत्र च ।
पूजयित्वा ततो वृक्षं बलिं भूताय दापयेत् ॥
प्रभाते छेदयेद्वृक्षं शुभस्वप्नादिदर्शनैः ।
शुक्लाम्बरधरश्चैव समुद्रतरणं नदी ॥
वृक्षाग्नमस्वान् शुभान् चीरानारोहेत् देवता-
लयम् ।
देवो द्विजस्तथा साधुलिङ्गश्च हरेरपि ॥
प्रतिमा पूजिता स्वप्ने क्षिप्रं सिद्धिफलप्रदा ।
मत्स्यमांसदधिलाभं रुधिरं घृतरोदनम् ॥
अगम्यागमनं दृष्ट्वा आशु सिद्धिफलप्रदम् ।
द्रुमांस्तिलं धनं धान्यं शत्रुनाशं यथा शुभम् ॥
फलं पुष्पं सिता दूर्व्वा स्वप्ने लब्धा जयावहाः ।
शङ्खगावस्तथा दन्तिलाभा राज्यप्रदायकाः ॥
गौः सवत्सा नवसुता दृष्टा पुत्त्रफलप्रदा ।
पङ्कस्योद्धरणं कूपे व्याधिमोक्षकरं चिरात् ॥
एवं स्वप्नान् शुभान् दृष्ट्वा तथा छिन्देत पाद-
पम् ।
उदङ्मुखः प्राङ्मुखो वा मधुवक्राक्तपर्शुना ॥
पूर्व्वोत्तरे च पतनं शस्तोऽशब्दोऽव्रणः शुभः ।
अलग्नपादपे चान्ये अन्यथा तु परित्यजेत् ॥
अष्टाङ्गुलं त्यजेत् मूले अग्रे तन्तु जले क्षिपेत् ।
तथा तमानयेद्वत्स शकटेन वृषैरपि ॥
युवानैर्बलसम्पन्नैर्नेयं तत्पुरतः परम् ।
नीयमाना यदा यष्टी समा वा चतुरस्रका ॥
हृत्ता वा भङ्गमाधत्ते राज्ञः पुत्त्रं पुरोहितम् ।
आरभङ्गे बलं भिन्द्याद्राज्यनाशं चयं तथा ॥
अर्थस्य अक्षभङ्गेन शान्तिन्तत्र तु कारयेत् ।
इन्द्रजेक्षत्रमन्त्रेण जातदेवसमापि वा ॥
तथा नीत्वा शुभे लग्ने पुरस्तादुपवेशयेत् ।
द्वारशोभां पथरथ्या गृहे हट्टे च कारयेत् ॥
यदा पटहनादाश्च वेश्याशङ्खद्विजातयः ।
सङ्कुलैर्वेदशब्दैश्च ता नेया यत्र उच्छ्रयेत् ॥
तत्रस्थाश्चित्रकर्म्मावनिर्म्मितैस्तान्तु वेष्टयेत् ।
वस्त्रैरण्डजरोमोत्थैः शुभैः शुक्लैर्यथाक्रमम् ॥
नन्दोपनन्दसंज्ञाश्च कुमार्य्यः प्रथमांशगाः ।
दव्यो जयविजयाख्याः षोडशांशव्यवास्थताः ॥